जम्भारिः, पुं, ( जम्भस्यासुरस्य अरिः शत्रुः । ) इन्द्रः । यथा, "जम्भारिइभोलयः ।" इत्युत्तरनैषधम् ॥ वह्निः । वज्रम् । इति विश्वः ॥ ( विष्णुः । इति महाभारतम् ॥)

जम्भी, [ न् ] पुं, ( जम्भयति क्षुधामान्द्यादिकं नाशयतीति । जभि क नाशे+णिनिः । ) जम्बीरः । इति शब्दचन्द्रिका ॥

जम्भीरः, पुं, ( जम्भ्यते अग्निवृद्ध्यर्थं भक्ष्यते इति । जभ+"गम्भीरादयश्च ।" इति ईरन् । ततो "रधिजभोरचि ।" ७ । १ । ६१ । इति नुम् ।) जम्बीरः । इत्यमरः । २ । ४ । ७६ ॥ मरुवकः । इति तट्टीकायां भरतः ॥

जयः, पुं, ( जि जये+"एरच् ।" ३ । ३ । ५६ । इत्यच् । ) शत्रुपराङ्मुखीकरणम् । जित् इति भाषा । तत्पर्य्यायः । विजयः २ जयनम् ३ । इत्यमरः । २ । ८ । १० ॥ (यथा, मनुः ।७।४४ ।

"इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥")

अग्निमन्थः । (जयतीति । जि+पचाद्यच् । ) जयन्तः । युधिष्ठिरः । इति मेदिनी । ये, ८५ ॥ (एतन्नाम तु विराटगृहे छद्मप्रवाससमये जातम् । यथा, महाभारते । ४ । ५ । ३४ ।

"जयो जयन्तो विजयो जयत्सेनो जयद्बलः ।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः ॥")

विजयनन्दनराजः । स तु इक्ष्वाकुवंशोद्भवः । इति हेमचन्द्रः । ३ । ३५८ ॥ श्रीनारायणपार्षदः । यथा,—

"एतौ द्वौ पार्षदौ मह्यं जयो विजय एव च ।
कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमम् ॥"
इति श्रीभागवते । ३ । १६ । २ ॥

(सर्व्वाणि भूतानि जयतीति । जीयते संसारमनेन वा । विष्णुः । यथा, महाभारते । १३ । १४९ । ६७ ।

"नयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥"

नागविशेषः । यथा, महाभारते ।५।१०३।१६ ।

"विरजा धारणश्चैव सुबाहुर्मुखरो जयः ॥"

दानवविशेषः । यथा, हरिवंशे । २३४ । ८३ ।

"जयो निकुम्भः कुपथश्च दानवौ
ररक्षुरेते दश दानवाधिपम् ॥"

दशममन्वन्तरीय-ऋषिविशेषः । यथा, भागवते । ८ । १३ । २१—२२ ।

"दशमो ब्रह्मसावर्णिरुपश्लोकसुतो मनुः ॥"
"हविष्मान् सुकृतः सत्यो जयो मूर्त्तिस्तदा द्विजाः ॥"

ध्रुववंशीयस्य वत्सरनृपस्य पुत्रविशेषः । यथा, तत्रैव ४ । १३ । १२ ।

"सुवीथी वत्सरस्येष्टा भार्य्यासूत षडात्मजान् ।
पुष्पार्णं तिग्मकेतुञ्च इषमूर्जं वसुं जयम् ॥"

विश्वामित्रपुत्रविशेषः । ( यथा, तत्रैव । ९ । १६ । ३६ ।

"एष वः कुशिका वीरो देवरातस्तमन्वित ।
अन्ये चाष्टकहारीतजयक्रतुमदादयः ॥"

उर्व्वशीगर्भजातः पुरूरवसः पुत्रविशेषः । यथा, तत्रैव । ९ । १५ । १ ।

"ऐलस्य चोर्व्वशीगर्भात् षडासन्नात्मजा नृप ! ।
आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः ॥"

राजर्षिविशेषः । यथा, महाभारते । २।८।१४ ।

"तस्यां राजर्षयः पुण्यास्तथा ब्रह्मर्षयोऽमलाः ।
यमं वैवस्वतं तात ! प्रहृष्टाः पर्य्युपासते ॥"

इत्युपक्रम्याह ।

"अङ्गो विष्टश्च वेणश्च दुष्मन्तः सञ्जयो जयः ॥"

धृतराष्ट्रपुत्राणामन्यतमः । यथा, तत्रैव । १ । ६३ । ११७ ।

"जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत ! ॥"

सञ्जयस्य राज्ञः पुत्रः । यथा, हरिवंशे । २९ । ८ ।

"सञ्जयस्य जयः पुत्रो विजयस्तस्य चात्मजः ।"

सञ्जयस्य राज्ञः पुत्रः । यथा, भागवते । ९ । १७ । १६ ।

"कुशात् प्रतिः क्षात्रवृद्धात् सञ्जयस्तत् सुतो [जयः ॥"

दौष्मन्तेर्मन्योः पुत्रविशेषः । यथा, तत्रैव । ९ । २१ । १ ।

"वितथस्य सुतात् मन्योर्बृहत्क्षत्रो जयस्ततः ॥"

युयुधानपुत्रः । यथा, तत्रैव । ९ । २४ । १४ ।

"युयुधानः सात्यकिर्व्वै जयस्तस्य कुणिस्ततः ॥"

भारतादिशास्त्रविशेषः । यथा, भविष्यपुराणे ।

"अष्टादशपुराणानि रामस्य चरितं तथा ।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत ! ॥
कार्ष्णञ्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ।
सौराश्च धर्म्मा राजेन्द्र ! मानवोक्ता महीपते ! ॥
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ॥"

दश्विखड्गारसङ्ग्रहम् । इति शब्दार्थचिन्तामणिः ॥ वत्सरविशेषः । तत्फलं यथा,—

"क्षत्त्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः ।
पीड़िताश्च वरारोहे ! जये सर्व्वे न संशयः ॥")

जयकोलाहलः, पुं, ( जयस्य कोलाहलो यत्र । ) पाशकभेदः । इति शब्दरत्नावली ॥ (जयस्य कोलाहलः ।) जयध्वनिश्च ॥

जयढक्का, स्त्री, ( जयघोषिका ढक्का । विजयकाले एव वादनादस्य तथात्वम् । ) वाद्यविशेषः । इति लोकप्रसिद्धा । जयढाक इति भाषा ॥

जयदत्तः, पुं, ( जयेन विजयेन दत्त इव । जयशीलत्वादेवास्य तथात्वम् । ) इन्द्रपुत्रः । इति हेमचन्द्रः । २ । ८९ ॥

जयनं, क्ली, ( जीयतेऽनेनेति । जि+करणे ल्युट् ।) तुरङ्गादिसन्नाहः । ( यथा माघे । १७।२३ ।

"सकलनं द्विरदगणं वरूथिन-
स्तुरङ्गिणो जयनयुजश्च वाजिनः ।
त्वरायुजः स्वयमपि कुर्व्वतो नृपाः
पुनः पुनस्तदधिकृतानतत्वरन् ॥"* ॥

भावे ल्युट् । ) जयः । इति मेदिनी । ने, ६७ ॥

जयनी, स्त्री, ( जयन+स्त्रियां ङीप् । ) इन्द्रकन्या । इति शब्दरत्नावली ॥

जयन्तः, पुं, ( जयतीति । जि+"तॄभूवहिवसीति ।" उणां ३ । १२८ । इति झच् । ) इन्द्रपुत्रः । तत्पर्य्यायः । पाकशासनिः २ । इत्यमरः । १ । १ । ४९ ॥ ऐन्द्रिः ३ । इति मेदिनी । ते, ११० । (यथा, रघौ । ३।२३ ।

"उमावृषाङ्कौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ ॥"

विष्णुः । यथा, महाभारते । १३ । १४९ । ६८ ।

"अर्को वाजसनः शृङ्गी जयन्तः सर्व्वविज्जयी ॥"

"अतिशयेनारीन् जयते जयहेतुरिति वा जयन्तः ।" इति तद्भाष्यम् ॥) शिवः । (यथा, मात्स्ये । ५ । ३० ।

"सावित्रश्च जयन्तश्च पिनाकी चापराजितः ।
एते रुद्राः समाख्याता एकादश गणेश्वराः ॥")

चन्द्रः । इति त्रिकाण्डशेषः ॥ भीमः । इति मेदिनी । ते, ११० ॥ (एतन्नाम तु छद्मना विराटगृहवासकाले जातम् । यथा, महाभारते । ४ । ५ । ३४ ।

"जयो जयन्तो विजयो जयत्सेनो जयद्बलः ।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः ॥"

मरुत्वतीगर्भजातो धर्म्मपुत्रविशेषः । अयं हि उपेन्द्र इत्याख्यया प्रसिद्धः । यथा, भागवते । ६ । ६ । ८ ।

"मरुत्वांश्च जयन्तश्च मरुत्वत्या बभूवतुः ।
जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः ॥"

राज्ञो दशरथस्य मन्त्रिविशेषः । यथा, रामायणे । १ । ७ । २—३ ।

"अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः ।
शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः ॥
धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्द्धनः ।
अकोपो धर्म्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित् ॥"

पर्व्वतविशेषः । यथा, हरिवंशे ।१७०।१४ ।

"ततश्च पर्व्वताः सप्त केशवं समुपस्थिताः ।
जयन्तो वैजयन्तश्च नीलो रजतपर्व्वतः ।
महामेरुः सकैलास इन्द्रकूटश्च नामतः ॥"

ज्योतिषोक्तयात्रिकयोगविशेषः । यथा,—

"यत्र स्वोच्चगतश्चन्द्रो लग्नादेकादशे स्थितः ।
जयन्तो नाम योगोऽयं शत्रुपक्षविनाशकृत् ॥")

षोड़शध्रुवकान्तर्गतध्रुवविशेषः । तस्य लक्षणं यथा,—

"आदितालेन जयन्तः स्यात् शृङ्गाररससंयुतः ।
रुद्रसंख्याक्षरपद आयुर्वृद्धिकरः परः ॥"
इति सङ्गीतदामोदरः ॥

जयन्तिका, स्त्री, ( जयन्तीव कायतीति । कै+कः । ततो ह्रस्वो निपातनात् । ) हरिद्रा । इति राजनिर्घण्टः ॥ ( दुर्गायाः सखीविशेषः । यथा, काशीखण्डे । ४७ । ४६ ।

"यथा जया च विजया यथा चैव जयन्तिका ॥")

जयन्ती, स्त्री, (जयतीति । जि+"तॄभूवहीति ।" उणां ३ । १२८ । इति झच् । ततो गौरा-